विद्युद्दूतः | vidyud-dūtaḥ

क्रमाङ्कः नवमः | Issue: Ninth

वसुधैव कुटुम्बकम्
INTERNATIONAL ASSOCIATION OF SANSKRIT STUDIES
अन्ताराष्ट्रियसंस्कृताध्ययनसमवायः

१/४/२०१४ | 1/4/2014

# मलवाहिनी कन्या

प्राप्तः सप्तवादनप्रायः समयः। वीथ्याम् आगच्छति स्म काचिद् मलवाहिनी कन्या। हस्ते सम्मार्जनी-कक्षे च जीर्णवंशकण्डोलः। बालभानुः स्वीयकोमलकरैः तां लालयति स्म। भगवती वसुन्धरा प्रतिपदं तस्याः कोमलपादौ चुम्बति स्म।

त्यक्त्वा स्वीयसुखं सुखाय जनतानारायणस्य, स्वकं ह्यस्तित्वं व्ययितं विधाय, तनुषे पारार्थ्यसेवां सदा।
कोशे ते न चकास्ति लोकविदितं हेयं जुगुप्सापदं मुग्धं प्रेम न लक्ष्यते तव जनैः स्वार्थैकलुब्धैर् भृशम् ॥ १॥

पुण्या ते प्रकृतिर्महात्मजनसंदोहाय मार्गप्रदा निस्स्वार्थस्य समाजसेवनविधेः त्यागस्य धर्मस्य च।
स्वातन्त्र्योज्ज्वलभारतस्य महितं सेवाप्रशंसापरं स्नेहालिङ्गनचुम्बनं ननु भवेत्ते ह्येव सर्वाग्रिमम् ॥ २ ॥

हस्ते मार्जनिकां परे च पिटकं वांशं गृहीत्वा चिरं भद्रे ! त्वं मलपापसंचयगणं ह्युद्धृत्य नेष्यस्यमुम्।
उद्विग्नं न मनो भवेत्तव कुतो ? देवस्त्वदीयां क्षमां दृष्ट्वा त्वामभिनन्दतीह सदयं सास्रैस्सहस्राक्षिभिः ॥ ३ ॥

आकल्पान्तभवं च ते प्रतिदिनव्यापारजातं सदा विश्वप्रेममहागमस्य विशदं भाष्यं वरीवर्ति यत्।
नीचं तद् विगणय्य कुत्सनपरा ह्येते च पापात्मकाः स्वानृण्यं जगदम्बिके! तव च नो निर्यातयेयुर्भृशम् ॥ ४ ॥

कुक्षिस्थं न च पूतिदेहममलिनं जानाति, दारिद्र्यतः क्षीणाङ्गेन च कृष्यमाणवहने गच्छन्हि लम्बोदरः।
मार्गात्त्वामपसर्तुमादिशति संरक्तं मुखं व्याक्षिपन् बोब्बोकश्च कियान्हि! संकलयते पुण्यं समग्रं हृतम् ॥ ५ ॥

कुत्सां लोककृतामिमाञ्च सकलां सोढ्वा युगारम्भतः त्यागं त्वत्कृतमुत्तमं न गणयन् लोको ह्यसौ मासिकम् ।
देयं रूप्यचतुष्टयं नु कुरुते दातुं च हाहारवं सृष्टा त्वं विधिना हि सेवनविधौ तस्येति संचिन्तयन् ॥ ६ ॥

भद्रे! दीनमुखं त्वदीयममलं दृष्ट्वैव तप्ताः कुतो रक्षांसीव विषं वमन्ति नितरां हालाहलं दुस्सहम् ।
क्रूरा मानवताकलङ्कजनकाः पापात्मका जन्तवः पाषाणात्मकचेतसां न हि दया दाक्षिण्यभावोऽपि वा ॥ ७ ॥

एकस्मिन् दिवसे पुरेषु तव चेत्सेवा च नो सम्भवेत् सौन्दर्यं प्रकटं भवेदवकरैस्सङ्कीर्णमार्गश्रियाम् ।
कण्डोलं स्वकरात् क्षणार्थमपि चेन्नीचैरवातारयेः याथार्थ्यं पुरजीवनस्य सुभगम्मन्यस्य बुद्धं भवेत् ॥८ ॥

पुण्यत्वदीयजनसेवनरीतिहेतोः त्यगात्मकस्य चरितस्य हितस्य हेतोः ।
नैकः कणः करुणतोऽश्रुजलस्य सृष्टः श्वासो विसृष्ट इह नो मनुजैः कवोष्णः ॥ ९ ॥

पादैरायसकैर्विमर्द्य भवतीं नीचैः क्षिपन्नेष वै मानुष्यस्य गणो न चार्हति चिरं क्षान्तिं त्वदीयां पराम् ।
भद्रे! स्वोदरपूरणाय विततास्सन्त्येव मार्गाश्शुभाः मूकाज्जीवनकाद् बहिर्भव शुभे! स्वस्त्यस्तु ते सन्ततम् ॥ १० ॥

कन्येयं मलवाहिनीति कुधियः केचित्स्वयंपाकिनः कुर्वन्तीह विगर्हणं तव विधेः शास्त्रार्थसम्मोहिताः ।
अर्धाधीतविकत्थनाश्च बत नो स्वश्चेतिवृत्तं विदुः माता सा मलवाहिनी ननु भृशं बाल्ये च तेषां मुदा ॥ ११ ॥

मातृस्थानमवाप्य राजसि भृशं लोके त्वमेतादृशी चित्तं ते प्रणयाधिदैवतगृहं क्षेत्रं च पुण्यं महत् ।
प्रख्याता च परार्थचिन्तनपरा भावत्कवृत्तिः परा विज्ञाता च भवत्प्रवृत्तिरमुका गृह्णीष्व मे वन्दनम् ॥ १२ ॥

‘ करुणश्री ’ जन्ध्याल पापय्य शास्त्री । संस्कृतानुवादकः — वेम्पटि कुटुम्ब शास्त्री ।

विद्युद्दूतस्य नवमाङ्कः समाप्तः